**अवखाद** पु० अववज्ञातः निन्दितः खादः खाद्यम् प्रा०स० । निन्दितखाद्ये "नातावखादो अस्ति वः" ऋ० १,४९,४ "अवखादः अवज्ञातः खादः जुगुप्सितहविर्विशेषः" भा०।

**अवगणन** न० अव+गण—भावे ल्युट् । १अवज्ञायां २निन्दने ३तिरस्कारे ४परिभवे च। [च ३तिरस्कृते ४पराभूते च ।

**अवगणित** त्रि० अव+गण—कर्म्मणि क्त । १अवज्ञाते २निन्दिते

**अवगण्ड** पु० अव+गम—ड डकारस्य नेत्त्वम् । गण्डस्थव्रणभेदे गण्डोपरिजाते रोगभेदे (गरगण्ड) ।

**अवगत** त्रि० अव+गम—क्त । १निम्नगते, २ज्ञाते च। "तस्मान्नावगतब्रह्मात्मभावस्य यथापूर्व्वं संसारित्वं यस्य तु यथापूर्व्वं संसारित्वं नासावगतब्रह्मात्मभाव" इति शा०भा० ।

**अवगति** स्त्री अव+गम—भावे क्तिन् । १ज्ञाने २निश्चयात्मकज्ञाने च "अवगतिपर्य्यन्तं ज्ञानं सन्प्रत्ययवाच्याया इच्छायाः कर्म्म फलविषत्वादिच्छायाः ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म"। "ब्रह्मावगतिर्हि पुरुषार्थः" ब्रह्मावगतिस्त्व प्रतिज्ञातेति" च शा०भा० । [उज्ज्व० ।

**अवगथ** पु० अव+गा—कर्त्तरि थ नि० ह्रस्वः । प्रातःस्नाते

**अवगदित** त्रि० अव+गद—कर्म्मणि क्त। १अपवादयुक्ते २निन्दिते।

**अवगम** पु० अव+गम-भावे घञ् । १ज्ञाने २निश्चयात्मकज्ञाने "प्रत्यक्षावगमं धर्म्म्यं सुसुखं कर्त्तुमव्ययम्" गीता ।

**अवगाढ** त्रि० अव+गाह—क्त । १निविड़े, २अन्तःप्रविष्टे, ३निमग्ने । यस्मिन् अवगाढ़ः कृतस्तस्मिन् ४जलादौ ५विषयभूते पदार्थे च। यथा घटज्ञानेन घटत्वविशिष्टघटस्तत्संसर्गस्च अवगाढ़ः। अस्य वा अतोलोपे वगाढ़ोऽप्युक्तार्थेषु

**अवगाह** पु० अव+गाह—घञ् । १स्नाने, २अन्तःप्रवेशे ३ज्ञानेन विषयीकरणे च ॥ आधारे घञ् । ४स्नानस्थाने। वा अल्लोपे वगाहोऽप्यत्रार्थे । ल्युटि । अवगाहनमप्यत्र न० ।

**अवगाह्य** त्रि० अव+गाह—कर्म्मणि ण्यत् । १अवगाहनादि योग्ये जलादौ २अन्तःप्रवेश्ये ३विषयीकार्य्ये च । अव+गाह—ल्यप् । ४अवगाहनं कृत्वेत्यर्थे अव्य०।

**अवगीत** त्रि० अव+गै—क्त । १निर्व्वादे जनापवादे २दुष्टे ३गर्हिते ३मुहुर्दृष्टे मेदि०भावे क्त । ४निन्दायाम् ४लोकापवादे च न०।

**अवगुण** पु० अव+गुण—क । दोषे । "परावगुणम् अन्य दोषमिति किरा० १३।४८। स्रोकव्या० मल्लि०।

**अवगुण्ठन** न० अव+गुण्ठ—ल्युट् । योषितां २शिरःप्रावरण क्रियायाम् । करणे ल्युट् । २मुखाद्याच्छादने वस्त्रे । "अवगुण्ठनसंवीता कुलजाभिसरेद्यदि" सा०द०। "चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः" सा०द० । स्रस्तावगुण्ठपटक्षणलक्ष्यमाणः "माघः । २आच्छादनमात्रे च कुमित्यवगुण्ठनं कृत्येति" तन्त्रम् ।

**अवगुण्ठनमुद्रा** स्त्री अवगुण्ठनाय मुद्रा । "सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी। अवकुण्ठनमुद्रेयमभितो भ्रमिता मता" तन्त्रसारोक्ते मुद्राभेदे ।

**अवगुण्ठिका** स्त्री अवगुण्ठयति आवृणोति अव+गुण्ठ—ण्वुल् स्त्रीत्वात् टापि अत इत्त्वम् । स्त्रीणां १मुखावरणशाट्याम्, २जवनिकायाञ्च । अव—गुण्ठ—धात्वर्थे ण्वुल् । ३अवगुण्ठनक्रियायाम् ।

**अवगुण्ठित** त्रि० अव+गुण्ठ—क्त । १कृतावगुण्ठने आवृते "रजनीतिमिरावगुण्ठिते" कुमा० । २चूर्णिते च

**अवगुम्फित** त्रि० अव+गुन्फ—कर्मणि क्त । ग्रथिते ।

**अवगूर्य्य** अव्य० अव+गुरी—उद्यमे ल्यप् । बधार्थं दण्डमुद्यम्येत्यर्थे "अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" मनुः।

**अवगृह्य** न० अव+ग्रह—क्यप् । व्याकरणसिद्धे प्रगृह्यसंज्ञके पदे । पाणिनीये प्रगृह्यमिति संज्ञा प्रातिशाख्ये तु अवगृह्यमिति संज्ञा । यस्यावग्रहः विशेषेण ग्रहः विच्छेदवत्त्वेन भवति न सन्धिकार्य्यं तत् पदं प्रगृह्यमवगृह्यमिति च भण्यते । यथा हरी एतौ इत्यादि ।

**अवगोरण** न० अव+गुर—उद्यमे ल्युट् । बधायास्त्राद्युद्यमे । दण्डनिपातनप्रायश्चित्तेन नान्तरीकतया प्रसङ्गेन अवगोरणनिमित्तप्रायश्चित्तस्य सिद्धिः" प्रा० वि० ।

**अवग्र(ग्रा)ह** पु० अव+ग्रह—घ १घञ् वा । १वृष्टिजलप्रतिबन्धे "वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम्" "रावणावग्रहक्लान्तमिति वागमृतेन सः" । नभोनभस्ययोर्वृष्टिमवग्रहइवान्तरे" इति च रघुः २अनावृष्टौ च "वृषेव सीतां तदवग्रहक्षताम्" कुमा०। ३निग्रहे "स्वयं विधाता सुरदैत्यरक्षसामनुग्रहावग्रहयोर्यदृच्छया" माघः । व्याकरणोक्ते सन्धिराहित्यरूपे ४विच्छेदे "इन्द्रोऽसि विशौजाः य०१०,२८ मन्त्रे विड़ौजा इति प्राप्ते विशौजास्छान्दसमतएव पदकारो नावग्रहं चकार" वेददी० । ५प्रतिबन्धमात्रे "अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा" नै० । ६गजसमूहे हारा० ७गजललाटे मेदि०। ८स्वभावे त्रिका० अवग्राहस्तु ९शापे । [मेदि० ३ज्ञाने च ।

**अवग्रहण** न० अव+ग्रह—भावे ल्युट् । १प्रतिरोधे २अनादरे

**अवघट्ट** पु० अव+घट्ट—आधारे घञ् । भूमिरन्ध्रे १छिद्रे त्रिका०